# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **प्रश्नपत्रम् – 5** | **गुणाः – ५०** |
| **विषयः – साहित्यम्** | **सत्रम् – 6** | **समयः – १० तः १२** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – साहित्यदर्पणः** | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।
सम्भोगे करुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ॥

२ क्वचिद्दोषस्तु समता मार्गाभेदस्वरूपिणी ।
अन्यथोक्तगुणेष्वस्या अन्तःपातो यथायथम् ॥

३ ओजः प्रसादो माधुर्यं सौकुमार्यमुदारता ।
तदभावस्य दोषत्वात्स्वीकृता अर्थगा गुणाः ॥

**प्रश्नः २ गुणालङ्कारयोः निरूपणं कुरुत ।**

**प्रश्नः ३ रीतयः कतिविधा ? तासां लक्षणम् उदाहरणं च प्रतिपादयत ।**

**प्रश्नः ४ कयोरपि द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ वैदर्भी चाथ गौडी च पाञ्चाली लाटिका तथा ।
माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका ॥

२ लाटी तु रीतिर्वैदर्भीपाञ्चाल्योरन्तरस्थिता ।
क्वचित्तु वक्त्राद्यौचित्यादन्यथा रचनादयः ॥

३ अर्थव्यक्तिः स्वभावोक्त्यालङ्कारेण तथा पुनः ।
रसध्वनिगुणीभूतव्यङ्ग्यानां कान्तिनामकः ॥

**प्रश्नः ५ अनुप्रासः इति अलङ्कारस्य निरूपणं कुरुत ।**

**प्रश्नः ६ उपमा इति अलङ्कारस्य सोदाहरणं निरूपणं कुरुत ।**

**प्रश्नः ७ कयोरपि द्वयोः ससन्दर्भं व्याख्या कार्या ।**

१ शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः ।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत् ॥

२ अनेकस्यैकधा साम्यमसकृद्वाप्यनेकधा ।
एकस्य सकृदप्येष वृत्यनुप्रास उच्यते ॥

३ व्यञ्जनं चेद्यथावस्थं सहाद्येन स्वरेण तु ।
आवर्त्यतेऽन्त्ययोज्यत्वादन्त्यानुप्रास एव तत् ॥

**प्रश्नः ८ एकावली इति अलङ्कारस्य सोदाहरणं निरूपणं कुरुत ।**

**प्रश्नः ९ विश्वनाथस्य परिचयं विलिख्य साहित्यदर्पणस्य वैशिष्ट्यं प्रतिपादयत ।**

**प्रश्नः १० दशानाम् एकवाक्येन उत्तरं लिखत ।**

१ साहित्यदर्पणस्य रचयिता कः ?
२ साहित्यदर्पणे कति परिच्छेदाः ?
३ उत्प्रेक्षा लक्षणं किम् ?
४ आचार्यविश्वनाथस्य पितुर्नाम किम् ?
५ दोषाणां कति भेदाः भवन्ति ?
६ पददोषाः कति सन्ति ?
७ अनुप्रास इति शब्दस्य कोऽर्थः ?
८ वक्रोक्तेः कति भेदाः भवन्ति ?
९ रीतिः कतिविधा भवति ?
१० कति काव्यगुणाः ?
११ नवमपरिच्छेदस्य प्रधानो विषयः कः ?
१२ साहित्यदर्पणानुसारेण श्लेषस्य कति भेदाः भवन्ति ?
१३ रूपकं कतिविधम् ?
१४ उपमायाः कति भेदाः स्वीकृताः विश्वनाथेन ?
१५ अनुप्रासस्य किं लक्षणम् ?

****